No. १३८१ क

Title आपदुद्धारकबटुकभैरवस्तोत्रम्

Author

Extent २१पत्र Age

Subject तन्त्र

नं. १८० ३३३

5841/12

ॐ १

ॐ नमः शिवाय मेरुपृष्ठे समासीनं देवदे
वं महेश्वरम् शंकरं परिपप्रच्छ पार्वती परमेश्व
रम् १ पार्वत्युवाच भगवन् सर्वधर्मज्ञ सर्वशा
स्त्रागमादिषु आपदुद्धारणं मंत्रं सर्वसिद्धिप्रदं
नृणाम् २ सर्वेषां चैव भूतानां हितार्थं वाञ्छितं
मया विशेषतस्तु राज्ञो वै शान्तिपुष्टिविवर्धन
म् ३ अंगन्यासकरन्यासदेहन्याससमन्वितम्
वक्तुमर्हसि देवेश मम हर्षविवर्धनं ४ श्रीईश्व
र उवाच शृणु देवि महामंत्रमापदुद्धारहेतुकं

सर्वदुःखप्रशमनं सर्वशत्रुविनाशनं ५ अपस्मा
रादिरोगाणां ज्वरादीनां विशेषतः नाशनं स्मृ
तिमात्रेण मंत्रराजमिमं प्रिये ६ सर्वकामार्थदं
देवि राजभोगप्रदं नृणाम् आपदुद्धारमिति य
न्मंत्रं वदाम्यशेषतः ग्रहराजभयानां च नाशनं
सुखवर्धनम् स्नेहाद्वदामि ते मंत्रं वेदसारमिमं
प्रिये सर्वकामार्थदं देवि साधकानां प्रभावदम्
नामाष्टशतकस्यास्य छन्दोनुष्टुप् प्रकीर्तितम्
बृहदारण्यको नाम ऋषिर्देवोस्य भैरवः प्रणवं बी

ॐ. वंमन्त्रमूर्त्यदेवीप्रणवमुद्धरेत् वट्कायेतिवैपश्चा
२ द्रापजुद्धारणायच ऊरुद्धयंततःपश्चाद्धृट्कायपुनः
2 क्षिपेत् देवीप्रणवमुद्धृत्यमंत्रोद्धारमिमंप्रिये मंत्रो
द्धारमिमंदेवित्रैलोक्येचापिदुर्लभं अप्रकाश्यमि
मंमंत्रंसर्वशक्तिसमन्वितं स्मरणादेवमंत्रस्यभू
तप्रेतपिशाचकाः विद्रवंत्यतिभीतावैकालरुद्रा
दिवप्रजाः पठेद्वापाठयेद्वापिपूजयेद्वापिपुस्तकं
नाग्निचौरभयंतत्रग्रहराजभयंतथा नचमारीभयं
किंचित्सर्वत्ररुद्रवद्भवेत् आयुरारोग्यमैश्वर्यं

पुत्रपौत्रादिसंपदः भवंतिसततंतस्यभक्तकस्या
पिपूजनात् पार्वत्युवाच कण्ठभैरवोनामआपदु
द्धारकोमतः त्वयायःकथितोदेवभैरवःकल्पवित्त
मः तस्यनामसहस्राणिह्ययुतान्यर्बुदानिच सार
मुद्धृत्यतेषांवैनामाष्टशतकंवद यानिसंकीर्तय
न्मर्त्यःसर्वदुःखविवर्जितः सर्वान्कामानवाप्नोति
साधकःसिद्धिमेवच ईश्वरउवाच शृणुदेविप्रवक्ष्या
मिभैरवस्यमहात्मनः आपदुद्धारकस्येहनामाष्ट
शतमुत्तमं सर्वपापहरंपुण्यंसर्वोपाधिनिवारण

श्रा· म् सर्वकार्यार्थसिद्ध्यर्थे विनियोग इति स्मृतः ॥ अ
३ ष्टवाङ्गं त्रिनयनमिति बीजं समाहितम् शक्तिकं की
लकं चैव मिष्टसिद्धौ नियोजयेत् लज्जाबीजं बीजमि
ति वटुकायेति शक्तिकं प्रणवः कीलकं प्रोक्तमिष्टसि
द्धौ प्रयुज्यते हृदंगुष्ठयोर्न्यस्य तर्जन्योर्विशिखीसवे
शिवं मध्यमयोर्न्यस्यानामिकायां त्रिशूलिनं ब्रह्मा
णं तु कनिष्ठायां तलयोस्त्रिपुरान्तकं मांसाशिनं करा
ग्रे तु करपृष्ठे दिगंबरं भैरवं मूर्ध्नि विन्यस्य ललाटे
भीमदर्शनं नेत्रयोर्भूतहननं सारमेयानुगं स्क

वोः कर्णयोर्भूतनाथं च प्रेतबाहुं कपोलयोः नासा
पुटोष्ठयोश्चैव भस्मांगं सर्पभूषणं अनादिनाथमा
स्ये च शक्तिहस्तं गलेन्यसेत् स्कंधयोर्दैत्यशमनं वा
होरतुलतेजसं पाणोः कपालिनं न्यस्य हृदये मुं
डमालिनं शान्तं वक्षःस्थले न्यस्य स्तनयोः कामचा
रिणं उदरे च सदा तुष्टं नैऋतं पार्श्वयोस्तथा नेत्रपा
लं पृष्ठदेशे देवज्ञं नाभिदेशके पापौघनाशनं कट्यां
वटुकं लिंगदेशके गुदे रत्नाकरं न्यस्य तथोर्वो रक्तलो
चनं जान्वोर्घुर्घुरारावं जंघयोः रक्तपायिनं गुल्फयोः

श्रा॰
८

पादुकासिद्धं पादपृष्ठे स्मरेश्वरं आपादमस्तकं चै
व आपङ्कारकं तथा पूर्वे डमरुहस्तं च दक्षिणे दंड
धारिणं खड्गहस्तं पश्चिमे च घंटावादिनमुत्तरे आ
ग्नेय्यामग्निवर्णं चैनैऋत्यां च दिगंबरं वायव्ये सर्वभू
तस्थमीशान्यां सर्वसिद्धिदं ऊर्ध्वे खेचरिणं न्यसपा
ताले शेषरूपिणं एवं विन्यस्य देहस्थे षडंगेण ततो
न्यसेत् हृदये भूतनाथाय आदिनाथाय मूर्धनि आ
नंदपदपूर्वाय नाथाय शिखायां च सिद्धशाबर
नाथाय कवचे विन्यसेत्तथा सहजानंदनाथाय

न्यसेन्नेत्रत्रयेतथा निःसीमानंदनाथायअस्त्रेचैव
प्रयोजयेत् बीजपूर्वैर्विनिर्न्यस्यन्यासंकुर्याद्विचक्ष
णः एवंन्यासविधिंकृत्वायथावत्तदनंतरं ध्यानंत
स्यप्रवक्ष्यामियथाध्यात्वापठेन्नरः शुद्धस्फटिकसंका
शंसहस्रादित्यवर्चसं नीलजीमूतसंकाशंनीलां
जनसमप्रभं अष्टबाहुंत्रिनयनंचतुर्बाहुंद्विबाहुकं
दंष्ट्राकरालवदनंनूपुरारावसंकुलं भुजंगमेखलं
देवमग्निवर्णशिरोरुहं दिगंबरंकुमारीशंवटुकाख्यं
महाबलं खट्वांगमसिपाशंचशूलंदक्षिणभागतः

श्री॰ डमरुंचकपालंचवरदंभुजगंतथा अग्निवर्णंस
५ मोपेतंसारमेयसमन्वितं ध्यात्वाजपेत्सुसंतुष्टः
5 सर्वकामानवाप्नुयात् ॐअस्यश्रीआपदुद्धारण
वटुकभैरवस्तोत्रमंत्रस्य बृहदारण्यकऋषि रनु
ष्टुप्छंदः श्रीवटुकभैरवोदेवता ह्रींबीजं वटुकायश
क्तिः प्रणवःकीलकं सर्वकामार्थसिद्धयेजपेविनि
योगः बृहदारण्यकऋषयेनमः शिरसि अनुष्टुप्छंद
सेनमो मुखे श्रीवटुकभैरवदेवतायैनमो हृदये ह्रीं
बीजायनमो गुह्ये वटुकायशक्तयेनमः पादयोः ॐकील^
कायनमो

नाभौ जपेविनियोगः सर्वांगेषु इतिऋष्यादिन्या
सः अथकरन्यासः ॐह्रांवांअंगुष्ठाभ्यांनमः ॐह्रीं
वींतर्जनीभ्यांस्वाहा ॐह्रूंवूंमध्यमाभ्यांवषट् ॐह्रैं
वैंअनामिकाभ्यांहुं ॐह्रौंवौंकनिष्ठकाभ्यांवौषट्
ॐह्रःवःकरतलकरपृष्ठाभ्यांफट् इतिकरन्यासः
अथहृदयादिन्यासः ॐह्रांवांहृदयायनमः ॐह्रीं
वींशिरसेस्वाहा ॐह्रूंवूंशिखायैवषट् ॐह्रैंवैंकव
चायहुं ॐह्रौंवौंनेत्राभ्यांवौषट् ॐह्रःवःअस्त्रायफ
ट् इतिषडंगन्यासः अथदेहन्यासः ॐभैरवायन

श्रा०
६

मः मूर्ध्नि भीमदर्शनायनमो ललाटे भूतनाथाय
नमो नेत्रयोः सारमेयानुगायनमः भ्रुवोः भूतना
थायनमः कर्णयोः प्रेतवाहनायनमः कपोलयोः
भस्मांगायनमो नासारंध्रयोः सर्वार्थरूपायनमः ओ
ष्ठयोः अनादिभूतायनम आस्ये शक्तिहस्तायनमः
कंठे दैत्यशमनायनमः स्कंधयोः अतुलतेजसे
नमो बाह्वोः करालिनेनमः पाण्योः मुंड मालिने
नमो हृदये शांतायनमो वक्षसि कामचारिणेनमः
स्तनयोः सदातुष्टायनमः उदरे क्षेत्रेशायनमः

पार्श्वयोः क्षेत्रपालायनमः पृष्ठे क्षेत्रज्ञायनमो ना
भौ पापौघनाशायनमः कण्ठे वटुकायनमो लिंगे
रक्तकायनमो गुदे रक्तलोचनायनमो ऊर्वोः कुक्कुरा
रावायनमो जान्वोः रक्तपायिनेनमो जंघयोः पा
दुकासिद्धायनमो गुल्फयोः स्वेरेश्वरायनमः पाद
पृष्ठे आपदुद्धारकायनम आपाद मस्तके डमरुह
स्तायनमः पूर्वे दंडधारिणेनमो दक्षिणे खड्गहस्तायन
मः पश्चिमे घंटावादिनेनमः उत्तरे अग्निवर्णायनमः
आग्नेये दिगंबरायनमो नैरृते सर्वभूतस्थायनमः

श्री॰ वायवे अष्टसिद्धिदायनमः ईशाने त्रिचारिणेनम ऊ
८ र्ध्वे शेषरूपिणेनमः पाताले इतिदेहन्यासः भूतना
थायनमो हृदये आदिनाथायनमो मूर्ध्नि आनंद
नाथायनमः शिखायां सिद्धशावरनाथायनमः कव
चे सहजानंदनाथायनमः नेत्रयोः निःसीमानंदना
थायनमः अस्त्रायफट् अथमंत्रन्यासः ॐ ह्रीं अंगुष्ठा
भ्यांनमः वटुकायतर्जनीभ्यांनमः आपदुद्धारणायम
ध्यमाभ्यांनमः कुरुकुरुअनामिकाभ्यांनमः वटुकाय
कनिष्ठकाभ्यांनमः ह्रींकरतलकरपृष्ठाभ्यांनमः इति

करन्यासः अथहृदयादिन्यासः ॐ ह्रीं हृदयायनमः
वटुकायशिरसेस्वाहा आपदुद्धारणायशिखायैवषट्
कुरुकुरुकवचायहुं वटुकायनेत्रत्रयायवौषट् ह्रीं अ
स्त्रायफट् इतिषडंगन्यासः अथध्यानम् नीलाद्रिदंष्ट्रम
हाकायकल्पान्तदहनोपम भैरवायनमस्तुभ्यमनुज्ञां
दातुमर्हसि १ ध्यानमिदं ॐकरकलितकपालःकुंडली
दंडपाणिः तरुणतिमिरनीलोव्यालयज्ञोपवीती क्रतुस
मयसपर्याविघ्नविच्छेदहेतुर्जयतिवटुकनाथःसिद्धिदः
साधकानां २ अथसात्विकध्यानम् ॐवंदेबालंस्फटिक

श्रा॰ महेशं कुण्डलोद्भासिवक्त्रं दिव्याकल्पैर्नवमणिमयैः किं-
८ किणीनूपुराद्यैः दीप्ताकारं विशदवदनं सुप्रसन्नं महे-
शं हस्ताब्जाभ्यां वटुकमनिशं शूलवज्रौ दधानं ३ अथ
राजसध्यानम् ॐ उद्यद्भास्करसन्निभं त्रिनयनं रक्तांगरा-
गस्रजं स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः
नीलग्रीवमुदारभूषणयुतं शीतांशुखण्डोज्ज्वलं बन्धूका-
रुणवाससं भयहरं देवं सदा भावये ४ अथ तामसध्यान-
म् ध्यायेन्नीलाद्रिकान्तिं शशिशकलधरं मुण्डमालं महे-
शं दिग्वस्त्रं पिंगकेशं डमरुमथ सृणिं खड्गशूलाभयानि

नागं घंटां कपालं करसरसिरुहैर्बिभ्रतिं भीमदंष्ट्रं सर्पा

कल्पं त्रिनेत्रं मणिमयविलसत्किंकिणीनूपुराढ्यं ३

तिसञ्चरजन्तमेऽध्यानानि ततो मूलगायत्री ॐ ह्रीं वटु

कायविद्महे आपदुद्धारणाय धीमहि तन्नो वटुकः प्र

चोदयात् ३ इति दशधाजप्त्वा तदनंतरं मूलमंत्रमष्टो

त्तरशतं च जप्त्वा अथ मूलमंत्रः ॐ ह्रीं वटुकाय आपदु

द्धारणाय कुरु कुरु वटुकाय ह्रीं इति मंत्रः तदनंतरं स्तोत्र

पाठं कुर्यात् ॐ भैरवो भूतनाथश्च भूतात्मा भूतभाव

नः क्षेत्रज्ञः क्षेत्रपालश्च क्षेत्रदः क्षत्रियो विराट् श्मशा

भ्रा. नवासीमांसाशीत्वर्पराशीस्मशांतकृत् रक्तपःपाश
९ पः सिद्धः सिद्धिदः सिद्धसेवितः करालः कालशमनः
9 कलाकाष्ठातनुः कविः त्रिनेत्रो बहुनेत्रश्च तथापिंग
ललोचनः शूलपाणिः खड्गपाणिः कंकालीधूम्रलोच
नः अभीरुर्भैरवीनाथो भूतिदो योगिनीपतिः धनदो
धनहारी च धनवान् प्रतिभानवान् नागहारो नागपा
शो व्योमकेशः कपालभृत् कालः कपालमाली च क
मनीयः कलानिधिः त्रिलोचनो ज्वलन्नेत्रस्त्रिशिखी च
त्रिलोकपः त्रिनेत्रतनयो डिंभः शांतः शांतजनप्रियः

वटुकोवटुकेशश्चखट्वांगवरधारकः भूताध्यक्षः प
शुपतिर्भिक्षुकः परिचारकः धूर्तोदिगंबरः शूरोहरि
णः पाण्डुलोचनः प्रशांतः शांतिदः शुद्धः शंकरप्रियबां
धवः अष्टमूर्तिर्निधीशश्चज्ञानचक्षुस्तपोमयः अष्टा
धारः षडाधारः सर्पयुक्तः शिखीसखः भूधरोभूधराधी
शोभूपतिर्भूधरात्मजः कंकालधारीमुंडीचनागय
ज्ञोपवीतवान् जृंभणोमोहनस्तंभीमारणःक्षोभण
स्तथा शुद्धनीलांजनप्रख्योदैत्यहामुंडभूषितः बलि
भुग्बलिभुङ्नाथोबालोबालपराक्रमः सर्वापत्तार

श्री· ।गोऽङ्गगौडसम्भूतनिषेवितः कामीकलानिधिःको
९ नःकामिनीवशकृद्वशी सर्वसिद्धिप्रदोवैद्यःप्रभुर्वि
10 ष्णुरितीवहि अष्टोत्तरशतेनाम्नां भैरवस्य महात्मनः
मयातेकथितंदेविरहस्यंसर्वकामदं यइदंपठतिस्तो
त्रंनामाष्टशतमुत्तमं नतस्यदुरितंकिंचिन्नरोगाणांभ
यंतथा नशत्रुभ्योभयंकिंचित्प्राप्नुयान्मानवःक्वचित्
पातकानांभयंनैवपठेत्स्तोत्रमनुत्तमं मारीभयेराज
भयेतथाचौराग्निजेभये औत्पातिकेमहाघोरेतथादुः
स्वप्नजेभये बंधनेचतथाघोरेपठेद्यःस्तोत्रमुत्तमं

सर्वं प्रशममायाति भयं भैरवकीर्तनात् एकादशस
हस्रं तु पुरश्चरणमुच्यते यः त्रिसंध्यं पठेद्देवि संवत्स
रमतन्द्रितः स सिद्धिमाप्नुयादिष्टां दुर्लभामपि मान
वैः षण्मासं भूमिकामस्तु जपित्वा प्राप्नुयान्महीं रा
ज्यशत्रुविनाशार्थं जपेन्मासाष्टकं तथा रात्रौ वारत्र
यं देवि नाशयत्येव शात्रवम् जपेन्मासत्रयं मर्त्यो राजा
नं वशमानयेत् धर्मार्थी वा सुतार्थी वा दारार्थी यस्तु
मानवः पठेन्मासत्रयं देवि वारमेकं तथा निशि य
ने पुत्रांस्तथा दाराः प्राप्नुयान्नात्र संशयः रोगी रोगा

भै॰
११

स्मरच्चेतदेविसत्यंनसंशयः निगडैश्चापिबद्धो
यःकारागृहेनिपातितः श्रृंखलाबंधनेश्यामः पठे
न्नैवदिवानिशं यंयंसमीहतेकामंतंतंप्राप्नो
तिमानवः अप्रकाश्यमदातव्यंनदेयंयस्यकस्यचि
त् सत्कुलीनायशांतायऋजुचित्तायशीलिने दद्या
त्स्तोत्रमिदंपुण्यंसर्वकामफलप्रदम् भैरवोपिप्र
हृष्टोभूत्तस्यचमहेश्वरः एवंश्रुत्वाततोदेवीना
माष्टशतमुत्तमम् संतोषंपरमंप्राप्यभैरवस्यम
हात्मनः संजप्यपरयाभक्त्यासदासर्वेश्वरेश्वरी

इतिश्रीरुद्रयामलेतंत्रेउमामहेश्वरसंवादेआप
दुद्धारणवटुकभैरवस्तोत्रंसमाप्तम् शुभम्

12